# द्वयोस्तृतीयो न भवेत्

## सनातन-दासः

वङ्गीयाः सरलाः कोमलाः ललिताः सुकुमाराश्च। ते यथा प्रतिवेशिनां दुःखं स्वकीयमिव चिन्तयन्ति तथैव पीडिताहतजनानां दुःखेन दुःखिता भवन्ति। यद्यपि तेषु जातिविरोधोऽस्ति तथापि पूजापार्वणेषु सामाजिककार्यक्रमेषु च ते सुतरां निरहंकाराः सन्त आत्मीयतां दर्शयन्ति। जातोत्सवादिषु आनन्दानुष्ठानेषु आनन्दिताः, सुखेषु सुखिनो भवन्ति नाम वङ्गीयाः। एवमेव कोमलमतयो वङ्गीयाः सुखेषु सुखिनो दुःखेषु दुःखिनः सन्तः सहायताञ्च कुर्वन्ति इतरेषाम्। एतादृशानां वङ्गीयानां चरित्रे रमणीयमेकं वैशिष्ट्यं सर्वेषां नयनपथमवगाहति। तत्तु कर्मण्यन्येषां चञ्चुप्रवेशनम्। "अपरेर कथाय नाक गलानो" इति स्वयमेव वदन्ति वङ्गवासिनः। यत्र कुत्राप्यन्येषां कर्मसु, वाक्यालापेषु, क्रीडादिषु च ते अति सारल्येन कोमलतया चञ्चुचालनं कुर्वन्ति। नाम अन्येषां कर्मणि उपयाचकतया स्वमतं स्थापयन्ति प्रतिपादयन्ति वा। फलरूपेण, उपायनरूपेण वा कुत्रापि स्वकीयावमानना कुत्रापि च स्वजातितिरस्कारः तैः लभ्यते। वस्तुतः नैष दोषः केवलम् इदानीन्तनकाले, न वा केवलं वङ्गीयानाम्। प्राचीनभारतेषु राजसु बहुत्र मन्त्रिषु, पुरोहितेषु, अमात्यादिषु च परिलक्ष्यतेऽयं दोषः। विषयेऽस्मिन् राज्ञो विक्रमादित्यस्य काचन कथा स्मरणीया।

कदाचित् सभास्थो नृपो विक्रमादित्यः पत्न्या सह वार्तालापं कर्तुमन्तःपुरं गतवान्। संलग्नमना राज्ञी तदा सख्या सह वार्तालापं कुर्वती आसीत्। विस्मयाविष्टेन वक्तुकामेन राज्ञा सहसा तयोर्मध्ये स्वभाषणं प्रदत्तम्। तच्छ्रुत्वा राज्ञी राज्ञः सम्मुखे केवलं पदद्वयं निगदितवती "मूर्खस्त्वम्" इति। मर्माहतः चकितश्च राजा झटिति स्थानं परित्यज्य सभां प्रत्यागतवान्। नासीत्तदा तस्य मनः सभायामालोच्यविषये। मनसा सर्वदैव चिन्तयन्नासीत् यद् विना कारणं राज्ञी किमर्थं माम् "मूर्खः" इति उक्तवती। केवलं सभाकविना कालिदासेनैव प्रश्नस्यास्योत्तरं दातुं शक्यम् इति। परन्तु कस्तावत् वदति स्वावमाननं, सापि नारीशकासात्? कौशलेन चातुर्येण वा ज्ञेयमस्योत्तरम्। अतो राजैकदा तेन सह वार्तालापं कुर्वन्तं कालिदासं "मूर्खस्त्वम्" इत्युक्तवान्। वचनं श्रुत्वा कालिदासस्य महान् क्रोधः सञ्जातः। सक्रोधमुवाच स श्लोकमिमम्–

खादन्न गच्छामि हसन्न जल्पे
गतं न शोचामि कृतं न मन्ये।
द्वयोस्तृतीयो न भवामि राजन्
केनास्मि मूर्खो वद कारणेन॥

अस्यायमर्थः "राजन्! विनैव कारणेन मां किमर्थं मूर्खस्त्वम् इत्युक्तवान्? अहं स्थितः खादामि (न तु खादन् गच्छामि), वार्तालापे न सहसा हसामि(हसन्न जल्पे), गच्छतः वस्तुनः कृते न शोचामि(गतं न शोचामि), कार्यं कृत्वा स्वप्रशंसां न करोमि(कृतं न मन्ये), नापि जल्पतोः द्वयोर्मध्ये भाषणं करोमि(द्वयोस्तृतीयो न भवामि)।"

तदैव राजा ततः प्रस्थितवान्। प्राप्तमिदानीं तेन स्वकीयापमानस्य कारणम्। वस्तुतस्तु विक्रमादित्यः द्वयोर्मध्ये भाषणं कृत्वा तृतीयोऽभवत्। तस्मात् राज्ञी तं "मूर्खस्त्वम्" इत्युक्तवती। इदं तावत् विक्रमादित्यचरितम्।

सत्यमेव न केवलं वङ्गीयानां, समस्तभारतीयानामेवैष दोषः त्यक्तव्यः। न चेत् उपहसनीयः सम्भविष्यति। जनद्वयस्य जल्पनकाले केनापि तृतीयेन तत्र सहसा सम्भाषणं किमपि वाचनं वा नैव शोभते। अन्येषां कर्माणि बाधः न भवेत्। तत्तु मूर्खतायाः अवमाननायाः वा लक्षणम्। अतः अस्माकं तु सर्वदैव पञ्चविन्दवः स्मर्तव्याः– (१)खादन्न गच्छामि (२)हसन्न जल्पे (३)गतं न शोचामि (४)कृतं न मन्ये (५)द्वयोस्तृतीयो न भवामि इति॥